CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ऊर्णनाभः

बहु पुरा काले एव मनुष्येण जालं वयन् वस्त्रधारणं प्रारब्धम्। किन्तु स बुद्धिमानपि इदं कार्यं बहु विलम्बेन शिक्षितवान्। ततो बहुपूर्वमेव ऊर्णनाभैः इदं कार्यं प्रारब्धम्। एतादृशं गृहं विश्वे स्थानं न मिलिष्यति यत्र ऊर्णनाभा न सन्तु। भित्तौ विशेषतः छदकोणे इमे स्वजालां निर्मान्ति। पर्वसु यदा गृहं स्वच्छं क्रियते तदा इमे जालाः सर्वत्र दृश्यन्ते। गृहिणीनां कृते जालापनयनं बहुपीडाकरम्। ताः प्रायः [illegible] – न जाने कुतः इयत् जाला आगच्छन्ति।

इत्थं यद्यपि ते कष्टदायकाः कीटा इति प्रतीयते किन्तु वस्तुतः ते मनुष्यस्य कृते लाभदाः। एकेन शोधपरीक्षणेन इदं सिद्धं यद् इंग्लैंड देशे प्रतिवर्षं यावतः कीटान् ऊर्णनाभाः खादन्ति तावतां सर्वेषां भारः साकल्येन तत्रत्यायाः सम्पूर्णजनतायाः भारादधिकतः।

ईदृशं किंचित् स्थानं नास्ति यद् ऊर्णनाभकृते दुर्गमम् – संसारस्य तुंगतमो हिमालयो वा भवतु भूगर्भगुहा वा भवतु। उष्णो वा स्यात् शीतो वा जलवायुः ऊर्णनाभाः स्वैरं जीवन्ति। तस्य तंत्रिकातन्त्रं विकसितं भवति – स्मरणशक्तिः जालनिर्माणशिल्पबुद्धिः तस्मिन् समर्था विद्यते। इदं ज्ञात्वा आश्चर्यं भवति यत् जालतन्तोः दृढता लोहपेशयाऽपि अधिका। मनुष्यः तन्तुं मोटयितुं क्षमते यतो हि स बहुसूक्ष्मो भवति। तावान् सूक्ष्मो लौहतन्तुः ततोऽपि सरलतारूपेण भज्येत। जालायां यः तन्तुः एक इव दृश्यते वस्तुतः तत्र सूक्ष्मतराणि बहूनि तन्तुकानि भवन्ति। तन्तुकानि एतावन्ति सूक्ष्माणि भवन्ति यत् सहस्रं तेषां मिलित्वाऽपि मनुष्यकेशसदृशीं स्थूलतां न लभेत। इयमेव ऊर्णा कथ्यते। अनया एव ऊर्णनाभः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एवं नाम जायते। तन्तुः भंगात् पूर्वं स्वदैर्घ्यस्य पंचमांशं यावत् वर्धितुं शक्नोति।

ऊर्णनाभस्य उदरस्यान्ते वयनः नाभियुगलं भवति। प्रायो द्वे वा त्रीणि वा युगलानि भवन्ति। प्रत्येक नाभौ सूक्ष्माणि छिद्राणि भवन्ति येभ्यः तन्तु-निर्मितिः निर्यास्यते। वयनसमये छिद्रमुखानि एकत्र क्रियन्ते येन तन्तुभागानि मिलित्वा एकं तन्तुं निर्मान्ति। तन्तुवयनादेव ऊर्णनाभः तन्तुवायोऽपि कथ्यते। तन्तोः एकमन्तं शाखायां भित्तौ वा संयोज्य ऊर्णनाभो भूमौ पतति तेन सहैव तन्तुः दीर्घीभवति। पुनः आरुह्यापरमन्तं तारयित्वा स अपरत्र योजयति। यदि निकटे किमपि अपरं स्थानं न भवति तदा स तन्तुमुदरात् निष्कास्य वायौ उड्डापयति। यदा तेषामपरोऽन्तः कुत्रापि लगति तदा स तान् तारयित्वा वृक्षादौ योजयति। अनेन विधिना एव ऊर्णनाभः नालानां [illegible]णां पारेऽपि तन्तुं तारयितुं शक्नोति।

द्वित्रान् आधारतन्तून् तारयित्वा स सर्वप्रथमं नाभिजालं वयति। इयं शैली भिन्ना न भवति। नाभिजालं परितः स अरान् वयति ततः च अरान् क्रमेण योजयन् स बाह्यजालं वयति। इयमेव शैली [illegible] भवति यत्र कीटः आगत्य श्लिष्यते। इत्थं जालं वयित्वा स निकटे एव विश्रामकुटीरं निर्माति, यथा गृहनिर्माणश्रमिकाः स्वकुटीरं निर्मान्ति। एतदर्थं स वृक्षस्य एकं पत्रं सम्पुटीकृत्य तन्तुभिः योजयति। तत्रैव स विश्रम्य प्रतीक्षते। किन्तु विश्रामात् पूर्वं स सन्देशतन्त्रीं वयितुं न विस्मरति। उताह्याजालस्य नाभितो विश्राम-स्थलपर्यन्तमेकः तन्तुः योज्यते। इयमेव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सन्देशतन्त्री। यदैव कोऽपि कीटो जालाया मू आश्लिष्यते सन्देशतन्त्री कम्पते।

झटिति ऊर्णनाभो निरीक्षणाय बहिः निस्सरति। ऊर्णनाभस्य दृष्टिः मन्दा भवति तस्मात् सः बहु सावधानः समुपैति। यदि कीटो भयंकरो भवति तदा स ऊर्णनाभः जालमाच्छिद्य मोचयति, अन्यथा मारयित्वा गृहमानयति। यदि कीटो बहु लघुः भवति तदा स तत्रैव खाद्यते। यदि कीटः खाद्यो भवति किन्तु संघर्षं करोति तदा ऊर्णनाभः अल्पं विषं प्रयुज्य तं विवशं करोति। कदाचित् कीटस्य गुरुतया जाला भज्यते। ऊर्णनाभः त्वरितमेव नवान् तन्तून् वयित्वा कीटं बध्नाति।

ऊर्णनाभानां काश्चित् जातयो जालं विनापि जीवन्ति। काश्चित् जले वसन्ति। यद्यपि गृहस्थाः ऊर्णनाभात् सर्वे बिभ्यति तथापि जन्तुः स हानिरहितो जन्तुः। प्रायः ते दशन्ति नहि, यदि दशन्ति तदापि बहु अल्पा पीडा भवति। बहु अल्पेषु ऊर्णनाभेषु विषं भवति। कालमर्कटनाम्नः ऊर्णनाभस्य विषं सर्पविषस्य तुलनायां प्रायो दशगुणं तीव्रतं किन्तु तस्य मात्रा एवती अल्पा भवति यत् कमपि पुरुषं हन्तुं न शक्नोति।

यदा भ्रमात् कोऽपि ऊर्णनाभः मनुष्य-शरीर संघट्टेन पिच्चितो भवति तदा मनुष्य-त्वचि पिटका निस्सरन्ति इति प्रायः कथ्यते। तस्य कारणं केवलमिदं यद् ऊर्णनाभस्य शरीर-द्रवं तत्र लगति। यदि बहु जलेन साधु प्रक्षालनं क्रियेत तदा कोऽपि उपद्रवो न भवति।

प्रायः ऊर्णनाभं दृष्ट्वा जना तं मारयितुं चेष्टन्ते किन्तु इदं विचारणीयं यत् ऊर्णनाभः हानिकरकीटानां भक्षणेन मनुष्याणां सहायता।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

करोति न हानिम्। तस्मात् गृहसंमार्जन-काले यदा जालाः अपसार्यन्ते तदा ऊर्णनाभस्य मारणेन कोऽपि लाभो नास्ति प्रत्युत एकस्य कीटशत्रोः मारणेन कीटानां वृद्धिरेव लभ्येत।

1- प्रायो गृहकोणेषु या जाला दृश्यन्ते ताः केन जन्तुना निर्मीयन्ते?
2- ऊर्णनाभस्य अपरं किं नाम? तस्य कोऽर्थः?
3- ऊर्णनाभा मनुष्यस्य कृते कथं लाभकराः?
4- ऊर्णनाभस्य जालायाः कीदृशा मार्गे श्लेष्मतन्तवो भवन्ति?
5- जालायां 'सन्देशतन्त्री' कुत्र भवति?
6- ऊर्णनाभः किं सदा उतायां जालायां तिष्ठति?
7- नालाया पारेऽपि ऊर्णनाभः स्वं तन्तुं कथं तनोति?
8- किं सर्वे ऊर्णनाभाः जालं वयन्ति?

@-



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्करः

एकस्मिन् दिने कक्षायां डीवान् नाम छात्रो न आगतः। अध्यापकेन पृष्टं कोऽपि जानाति "डीवान् कथं न आगतः" एकेन बालकेन (हुसेनेन) कथितम्- अहं तस्य प्रतिवेशी। गतरात्रौ आरक्षदलेन डीवान् गृहे धाटा कृता। तस्य सम्पूर्णं गृहं गवेषितम्। सर्वा सामग्री इतस्ततः क्षिप्ता। तस्मात् एतस्य माता अद्य तं विद्यालयं न प्रेषितवती।

सर्वे छात्रा उत्सुका जाताः। हुसेनं पृष्टवन्तः - कथं धाटा घटिता। तेन किं कृतम्? हुसेन उक्तवान् - नाहं जाने। ज्ञाता तत्र कथितवन्तः - तस्करस्य इयमेव गतिः भवति। तदा सर्वं जानन् अध्यापकः कथितवान् - शृणुत अहं युष्मभ्यं वदिष्यामि यत् किं नाम तस्करत्वम्। सर्वे छात्राः श्रोतुं सन्नद्धाः। अध्यापकः प्रारेभे—

सर्वस्मिन् देशे सर्वकारो व्यापारस्य उपरि नियंत्रणं करोति। कोऽपि व्यापारी यदा किमपि वस्तु विशालमात्रायामुत्पादयति तदा विक्रयस्य पूर्वं सर्वकाराय उत्पादशुल्कं ददाति। इत्थमेव यदा किमपि वस्तु देशाद् बहिः प्रेष्यते तदा निर्यातशुल्कं देयं भवति। यदा च किमपि वस्तु विदेशात् देशमानीयते तदा आयातशुल्कं सर्वकाराय देयं भवति। अनृता व्यापारिणः शुल्कभयात्वैव इदं सर्वं कार्यं चौर्येण कुर्वन्ति। इदं शुल्कचोरणमेव तस्करत्वं कथ्यते।

रमा पृष्टवती - श्रीमन् किं कोऽपि अधिकारी एषां कार्याणां निरीक्षणं निग्रहं च न करोति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ह्याप कोऽवदत — अवश्यं करोति। किन्तु सर्वदा सर्वत्र तु निरीक्षको निरीक्षितुं न शक्नोति। समुद्रतटे रात्रौ तस्करा इदं कार्यं कुर्वन्ति। अनेन व्यापारेण अवैध्या सम्पत्तिम् अर्जयन्ति। यदा सर्वकारो जानाति तदा तस्करस्य गृहे रात्रौ दिने वा बहवो आरक्षिभटा गच्छन्ति, बलात् गृहे अन्वेषणं कृत्वा अवैध-धनं गृह्णन्ति, अपराधिनं च बद्ध्वा कारागारे निगृह्णन्ति। इयं क्रियैव छापा कथ्यते।

व्यापृताः कथासमाप्तौ सर्वे छात्राः स्वकार्येषु किन्तु लाभसिंहः रहीमः डेविडः च मिथो वार्तां कृतवन्तः। तेषां मनसि इदं स्पष्टं मतं यत् यदा कोऽपि जनः विदेशात् स्वर्णं भारते आनयति तदा सर्वकारस्य का हानिः? तेन तु देशे स्वर्णाधिक्यं भवति। देशः समृद्धतरो भवति। योऽपि पुरुषो विदेशात् बहु सामग्रीं देशे आनयति स तु प्रशस्यो न तु निग्राह्यः। लाभसिंहः कथितवान् — चलतं युवाम् उभौ मया सह गृहम्। मम तातः आरक्षिविभागे निरीक्षकः। तं पृच्छाम।

विद्यालयानन्तरं ते त्रयोऽपि लाभसिंहस्य गृहं गतवन्तः। यदा तैः स्वः प्रश्नः समुत्थापितः तदा लाभसिंहस्य पिता चण्डीसिंहो बहु प्रसन्नो भूतः। स उक्तवान् — यूयं देशस्य लाभालाभविषये चिन्तयथ इति बहु सुन्दरम्। यस्य देशस्य बालकाः इत्थं विचारयन्ति सोऽवश्यमुन्नतो भवति। ~~[illegible]~~ तव प्रश्नस्योत्तरं किन्तु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सरलम्। यदा किमपि वस्तु विदेशात् क्रीत्वा देशे विक्रीयते तदा तत्र बहु लाभो भवति। तस्मिन् लाभे सम्पूर्ण देशस्य भागोऽस्ति। तं भागमेव सर्वकारः शुल्करूपेण गृह्णाति। तस्करा देशस्य लाभांशमपि स्वयं खादन्ति इति ते दण्डनीया भवन्ति।

रहीमः कथितवान् - मित्र! मया ते तस्करा न कदापि दृष्टाः। ते दर्शने कीदृशा भवन्ति।

हसन् चण्डीसिंहोऽकथयत् - दर्शने ते तथैव भवन्ति यथा वयम् भवामः। ते सामान्या एव पुरुषा भवन्ति। अन्यच्च! तिष्ठत मम पार्श्वे एका दूरदृश्य टेप कोषिका अस्ति। टेपदर्शके अधुनैव दर्शयिष्यामि। इत्थं कथयन् स दूरदृश्यटेपं टेपदर्शके, स्थापयित्वा टेपदर्शकं दूरदर्शनेन संयोजितवान्। झटित्येव दूरदर्शनस्य पटे एकं चित्रं दृश्यते स्म।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

"जीह नहि अयं तु डीङ्गलोऽस्ति तस्य स्यन्दना चालकः।" तेन पुनः कथितम् - "अयं अधुना कारागारे वसति। यस्मिन् दिनेऽयं दृश्यमासीत् तस्मिन् एव दिने स स्यन्दनायामैवैव्यवस्तूनि नयन् निगृहीतः। पश्चात् अधुनैव तद् दृश्यं मागमिष्यति। किंचिदनन्तरं तदपि दृश्यं दूरदर्शन पटे आगतम् — डीङ्गलः कारागारे नीयते स्म।

चलचित्रान्ते सर्वे बालका मनसि निश्चयं कृतवन्तः - वृद्धा भूत्वापि तस्कराणां निग्रहे सर्वकारस्य साहाय्यं करिष्यामः। कदापि शुल्कमप्रदाय वस्तूनि न क्रेष्यामः।

१- के तस्करा भवन्ति?
२- तस्करा रात्रौ कार्यं कुर्वन्ति कथम्?
३- उत्पादशुल्कं किं भवति?
४- तस्करा रात्रौ कथं कार्यं कुर्वन्ति?
५- घाटा का भवति?
६- शुल्कमप्रदाय वस्तु क्रयणं कथं न कार्यम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दिव्या दीपाली

ये निजकर्मणि सुखं लभन्ते तेषां गृहे सदा दीपाली ।

येषां गृहे बालका हृष्टाः
जननीजनक–खेल–रस–पुष्टाः
दीपा इव निज–हासरश्मिभिः
चिरं प्रकाशं ददते तुष्टाः

मृण्मयदीपाः ज्वलन्तु नो वा पूर्णा तत्र किन्तु दीपाली ।

यत्र सुशीला सरसा शान्ता
पत्या सदा पूज्यते कान्ता
लक्ष्मी रमते तत्र निर्मला
हंस–वाहिनी भूत्वाऽनन्ता

विना मृत्तिका-लक्ष्मीपूजां दिव्या भवति तत्र दीपाली ।

दीपालिकां शरीरं मत्वा
परिश्रमस्नेहेन च भृत्वा
उत्साहज्योतिः ज्वालय रे
निष्ठावृत्तिं वर्तीं कृत्वा ।
तदा पश्य देशेऽस्मिन् दीप्रा
कस्मिन् दिने नास्ति दीपाली ।

ये निज कर्मणि सुखं लभन्ते तेषां गृहे सदा दीपाली ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

डयन-वाहकाः

वयं कहाराः वधूं वहामः
तामधुना पतिगृहं नयामः ।
डयने मुग्धा साऽपि मोदते
यदा वयं गानं गायामः ॥
इतस्ततो दोलति सा डयने
यथा कोमला कलिका पवने ।
स्वप्ने यथा भावना तरला
यथा कोकिला मधुमयविपिने ॥
वयं चलामो मन्दं मन्दं
वयं नयामो मन्दं मन्दम् ।
वधूः कोमला तुषारकणिका
वयं वहामो मन्दं मन्दम् ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कीदृशो मनुष्यः !

(शशकमुखांकं, धारयन्तौ द्वौ, हरिणमुखांकं धारयन् एको बालः मंचे । व्याघ्रादीनां मुखांकं धारयित्वा अभिनयः कार्यः ।)

प्रथमशशकः— मधुरो घासः ।

द्वितीयः— मृदुलो घासः ।

प्रथमहरिणः— (दूरं पश्यन्) पश्य व्याघ्रशावः आयाति !!

द्वितीयः— पलायध्वम् ! पलायध्वम् !

व्याघ्रशावः— (धावन् प्रविशति । माता तं धर्तुम् अनुसरति ।)

माता— रे रे वत्स ! कुत्र गच्छसि ?

शावः— खेलितुं गच्छामि मातः !

माता— दूरं मा गच्छ वत्स ! निकटे खेल ।

शावः— किमर्थम् ?

माता— न जानासि, दूरे मनुष्या वसन्ति ।

शावः— मनुष्यः ? कः सः ?

माता— मनुष्यः अस्माकं शत्रुः । महाभयङ्करः सः । सावधानम् ! दूरं मा गच्छ ।

शावः— अस्तु । न गमिष्यामि । व्याघ्री निवर्तते । शावः अग्रे सरति ।)

व्याघ्रः— (प्रविश्य) किं भोः ! त्वमत्र कथम् ? मातरम् आह्वयानि ?

शावः— आह्वय । अहं मित्रं निमन्त्रयितुं गच्छामि ।

व्याघ्रः— को व्यापारः ?

शावः— अद्य उत्सवदिनम् । गृहे प्रीतिभोजो भवति । त्वमपि आगच्छ । हरिणमांसं प्राप्स्यसि ।

व्याघ्रः— कदा आगच्छेयम् ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शावः – मध्याह्ने ।

व्याघ्रः – सुष्ठु, आगमिष्यामि । (निर्गच्छति)

शावः – मा विस्मर ! (हृष्टः) छलित एषः । मातापि छलिता । कदापि मां न मुञ्चति । कथयति – गृहात् बहिर् मा गच्छ । यदि कोऽपि मनुष्यः पश्येत् तर्हि सर्वनाशः ! कीदृशोऽसौ मनुष्यः ? किं स मत्तः अधिकं वलवान् ? अद्य स द्रष्टव्यः ।

(वृद्धघोटकः धावन् आयाति)



शावः – कस्त्वम् ? अपि त्वं मनुष्यः ?

घोटकः – अहं न मनुष्यः, अहं घोटकः ।

शावः – अहं वनराजस्य पुत्रः । त्वं मां मनुष्यं दर्शय ।

घोटकः – दैव रे दैव ! अहं न शक्ष्यामि । मम भयं भवति ।

शावः – शृणु, अयं राजपुत्रस्य आदेशः । यदि न पालयेः तर्हि (चपेटां दर्शयति) ।

घोटकः – क्षम्यतां स्वामिन् ! मनुष्यः भयङ्करः । स मम प्राणान् हरिष्यति ।

शावः – न भेतव्यम् । अहं सर्वाधिकं वलवान् । कुतो भयम् ?

घोटकः – न हि स्वामिन् ! सोऽतीव भयङ्करः, क्रूरः, कृतघ्नः ।

शावः – कथमेतत् ?

घोटकः – पश्यतु, यौवने घोटकद्रवणिकायाम् अहं द्विवारं प्रथमपदं प्राप्तः । अधुना स वृद्धं माम् उपेक्षते । यथेष्टं भोजनमपि न ददाति । बहुभारं वाहयति, निर्दयं ताडयति । अहं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तस्मात् पलायितः, पुनर्नैव गमिष्यामि । (क्रन्दति) स मां मारयिष्यति ।

शावः—अस्तु, गच्छ । (चिन्तयन्) कीदृशो नु मनुष्यः ? कृतम् उपकारमपि न स्मरति ! अद्य तं दृष्ट्वा उचितां शिक्षां दास्यामि ।

(गच्छन्तं गर्दभं दृष्ट्वा)



अयि भोः ! कस्त्वम् ? अपि त्वं मनुष्यः ?

गर्दभः—अहं न मनुष्यः, अहं गर्दभः ।

शावः—तर्हि कीदृशोऽसौ मनुष्यः ? त्वं मां मनुष्यं दर्शयिष्यसि ?

गर्दभः—हरे हरे ! क्षम्यतां भद्र ! न शक्नोमि ।

शावः—राजपुत्रोऽहम् । आज्ञां न पालयसि ?

गर्दभः—क्षम्यतां स्वामिन् ! मनुष्यः अतीव भयङ्करः । अहं तं नैव उपगमिष्यामि ।

शावः—किं स सत्यं भयङ्करः ?

गर्दभः—न केवलं भयङ्करः, अपि तु निर्दयः, कृतघ्नः, प्रपीडकः ।

शावः—एवम् !

गर्दभः—पश्यतु, अहं तस्य गृहे बहुवर्षाणि अवसम् । स मां पृष्ठेन पर्वताकारं वस्त्रभारं वाहयति । मम कष्टं न बोधति । (क्रन्दति) मां भृशं ताडयति । पश्यतु इमानि चिह्नानि । पुनर्नैव उपगमिष्यामि तम् ।

शावः—अस्तु, गच्छ । कीदृशोऽसौ मनुष्यः ? सर्वे तं निन्दन्ति । कथं स द्रष्टव्यः ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

(चलति। वानरौ दृष्ट्वा)

शावः – रे रे वानरौ ! किं कुरुथः ?

प्रथमवानरः – अहो राजपुत्रः आयाति !

द्वितीयः – कुत्र गच्छसि राजपुत्र ?

शावः – मनुष्यं द्रष्टुम् । चलतं मया सह ।

प्रथमवानरः – नैव नैव । मनुष्यः महादुष्टः ।

शावः – अपि स त्वया सत्यं दृष्टः ?

प्रथमः – आम् आम्, सः अस्मान् धृत्वा पथि पथि नर्तयति । बहुकष्टेन आवां पलायितौ ।

द्वितीयः – त्वमपि पलायस्व ।

शावः – धत् ! सर्वे दुर्बलाः ! अहं व्याघ्रपुत्रः, बलवान् । एकलो गमिष्यामि ।

(वर्धकिः आयाति)

शावः – (यदा वर्धकिः निकटम् आयाति) अरे ! कस्त्वम् ?

वर्धकिः – (सभयम्) अहं वर्धकिः ।



शावः – अपि त्वं मनुष्यः ?

वर्धकिः – आम्, अहं मनुष्यः ।

शावः – तर्हि त्वमेव सः ! कुत्र गच्छसि ?

वर्धकिः – गृहं निर्मातुं गच्छामि ।

शावः – तिष्ठ । अहं वनराजस्य पुत्रः । प्रथमं मम कृते उत्तमं गृहं निर्माहि ।

वर्धकिः – न शक्नोमि । त्वराकुलः अहम् । (इति गच्छति ।)

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शावः – रे रे ! न शृणोषि, राजादेशं न पालयसि ? कृतघ्नो जीवः (चपेटयति) ।

वर्धकिः – (मस्तकं धृत्वा तिष्ठति । विचार्य वदति) अस्तु तावत्, तुभ्यं गृहं निर्मामि ।।
घनम् आनय ।

(निर्माणक्रियाम् अभिनयति)

शावः – (पञ्जरं परिक्रामन् नृत्यति, गायति ।)
पश्य मह्यं गृहं रचयति पश्य मह्यं गृहम् ।
सुखं मे वासो भविष्यति गृहं मे सुस्पृहम् ॥

वर्धकिः – राजपुत्र ! अपि रोचते ?

शावः – भृशं रोचते । (पञ्जरं निरीक्षमाणः) शोभनमिदम् ।

वर्धकिः – प्रविश तावत् । शोभय इदम् ।
(सिंहशावः यावत् प्रविशति तावत् वर्धकिः ठक् इति द्वारं संवरति । शावः बद्धः क्रुध्यति, गर्जति, विचेष्टते ।)

शावः – उद्घाटय ... हुम् ... उद्घाटय द्वारम् ... हुम् ... द्वारमुद्घाटय ।

वर्धकिः – राजपुत्र ! अधुना पञ्जरं चपेटय । साधयामि तावत् ।
(स्वरं परिवर्त्य किञ्चिद् उच्चैः) देहबलं किं बलम् ! बुद्धिबलं बलम् ! (इति सर्वे निष्क्रान्ताः)



Kashi Maharani Collection, Ramnagar Fort, Varanasi